# Andhakakritam Shiva Stotram

# अन्धककृतं शिवस्तोत्रम्

## Document Information

Text title : Andhakakritam Shiva Stotram

File name : andhakakRRitaMshivastotram.itx

Category : shiva, stotra

Location : doc_shiva

Proofread by : PSA Easwaran

Description/comments : from Kurmapurana, kUrmapurANe pUrvabhAge 16/194-206

Latest update : August 13, 2022

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

February 2, 2024

*sanskritdocuments.org*

Andhakakritam Shiva Stotram

# अन्धककृतं शिवस्तोत्रम्

अन्धक उवाच ।
नमामि मूर्ध्ना भगवन्तमेकं समाहिता यं विदुरीशतत्त्वम् ।
पुरातनं पुण्यमनन्तरूपं कालं कविं योगवियोगहेतुम् ॥ १॥

दंष्ट्राकरालं दिवि नृत्यमानं हुताशवक्त्रं ज्वलनार्करूपम् ।
सहस्रपादाक्षिशिरोभियुक्तं भवन्तमेकं प्रणमामि रुद्रम् ॥ २॥

जयादिदेवामरपूजिताङ्घ्रे विभागहीनामलतत्त्वरूप ।
त्वमग्निरेको बहुधाऽभिपूज्यो बाह्यादिभेदैरखिलात्मरूपः ॥ ३॥

त्वामेकमाहुः पुरुषं पुराणमादित्यवर्णं तमसः परस्तात् ।
त्वं पश्यसीदं परिपास्यजस्रं त्वमन्तको योगिगणाभिजुष्टः ॥ ४॥

एकोऽन्तरात्मा बहुधा निविष्टो देहेषु देहादिविशेषहीनः ।
त्वमात्मतत्त्वं परमात्मशब्दं भवन्तमाहुः शिवमेव केचित् ॥ ५॥

त्वमक्षरं ब्रह्म परं पवित्रमानन्दरूपं प्रणवाभिधानम् ।
त्वमीश्वरो वेदपदेष्वसिद्धः स्वयं प्रभोऽशेषविशेषहीनः ॥ ६॥

त्वमिन्द्ररूपो वरुणाग्निरूपो हंसः प्राणो मृत्युरन्तोऽसि यज्ञः ।
प्रजापतिर्भगवानेकरुद्रो नीलग्रीवः स्तूयसे वेदविद्भिः ॥ ७॥

नारायणस्त्वं जगतामथादिः पितामहस्त्वं प्रपितामहश्च ।
वेदान्तगुह्योपनिषत्सु गीतः सदाशिवस्त्वं परमेश्वरोऽसि ॥ ८॥

नमः परस्मै तमसः परस्तात्परात्मने पञ्चपदान्तराय ।
त्रिशक्त्यतीताय निरञ्जनाय सहस्रशक्त्यासनसंस्थिताय ॥ ९॥

त्रिमूर्त्तयेऽनन्तपदात्ममूर्त्ते जगन्निवासाय जगन्मयाय ।
नमो ललाटार्पितलोचनाय नमो जनानां हृदि संस्थिताय ॥ १०॥

मुनीन्द्रसिद्धार्चितपादपद्म ऐश्वर्यधर्मासनसंस्थिताय ।

नमः परान्ताय भवोद्भवाय सहस्रचन्द्रार्कविलोडनाय ॥ ११॥

नमोऽस्तु ते सोम सुमध्यमाय नमोऽस्तु ते देव हिरण्यबाहो ।
नमोऽग्निचन्द्रार्कविलोचनाय नमोऽम्बिकायाः पतये मृडाय ॥ १२॥

नमोऽस्तु गुह्याय गुहान्तराय वेदान्तविज्ञानसुनिश्चिताय ।
त्रिकालहीनामलधामधाम्ने नमो महेशाय नमः शिवाय ॥ १३॥

इति कूर्मपुराणे षोडशाध्यायान्तर्गतं
अन्धककृतं शिवस्तोत्रं समाप्तम् ।
कूर्मपुराणे पूर्वभागे १६/१९४-२०६

Proofread by PSA Easwaran

*Andhakakritam Shiva Stotram*

pdf was typeset on February 2, 2024

Please send corrections to *sanskrit@cheerful.com*